National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2023; 1(51): 232-234
© 2023 NJHSR
www.sanskritarticle.com

डा.नागराजभट्टः
सहाचार्यः, अद्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

Correspondence:
डा.नागराजभट्टः
सहाचार्यः, अद्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# अविद्यायाः पर्यायपदानाम् अर्थविशेषनिरीक्षणम्

डा.नागराजभट्टः

**शोधलेखसारः**

त्रिगुणात्मिका अविद्या मायाव्याकृताव्यक्तबीजशक्तिरिति नानाशब्दवाच्या अनिर्वचनीया परमेश्वरोपाधिः प्रपञ्चोपादानमिति वेदान्तराद्धान्तः। सत्त्वेनासत्त्वेन निरूपणासम्भवादेव तस्याः अनिर्वाच्यत्वमङ्गीकृतम्। तदीयानेकपर्यायशब्दार्थनिरीक्षणेन एव तत्स्वभावो निर्णेतुं शक्यः। "अव्याकृतम्, अविद्या, माया, प्रकृतिः, शक्तिः, महासुप्तिः तमश्चेति अनेके शब्दाः भाष्यकारव्याख्याकारैः तत्तद्व्याख्यासन्दर्भे उल्लिखिताः। भाष्यकाराः श्रीशङ्कराचार्याः स्वीयप्रस्थानत्रयभाष्ये अव्यक्तं, तमः माया, अज्ञानम् इत्यादिभिः अनेकैः तत्पर्यायशब्दैः तद्व्याख्यामकुर्वन्। तच्छिष्याः पद्मपादाचार्याः पञ्चपादिकाव्याख्यायाम् अविद्यानिर्वचनप्रसङ्गे तदीयानेकपर्यायशब्दैः अविद्यास्वरूपं व्याख्यातवन्तः। एवमेव सर्वज्ञात्ममुनिभिः संक्षेपशारीरके अविद्यायाः अनेके पर्यायशब्दाः प्रदर्शिताः। इत्थं शोधलेखेऽस्मिन् व्याख्याकारैः प्रयुक्तानां केषाञ्चिदेव मुख्यपर्यायपदानामालोचनेन अविद्यास्वरूपं समीक्ष्यते।

**कूटशब्दाः –** अव्याकृतम्, माया, तमः,अव्यक्तं, महासुप्तिः, निद्रा, लयः, अग्रहणम्

**भूमिका**

सत्त्वरजस्तमोगुणात्मिकां मायामुपेत्य सर्वज्ञसर्वशक्तः परमेश्वरः जीवकर्मानुगुणं चराचरात्मकं जगत्ससर्ज इति श्रूयते। अयं भूतभौतिकप्रपञ्चः त्रिगुणात्मकः अनिर्वचनीयस्वरूपः तस्या एव परमेश्वराश्रितायाः मायाशक्तेः विलासः। सा च बीजशक्तिः अनिर्वाच्या इति "अव्यक्ता हि सा माया तत्त्वान्यत्वनिरूपणस्य अशक्यत्वात्"[1] इत्यादिना भाष्यकारैरेव भणितम्। जडत्वानित्यत्वादिः अविद्यास्वभावः तदीयकार्येण एव अनुमेयो भवतीति उच्यते। तदुक्तं –

**अव्यक्तनाम्नी परमेशशक्तिरनाद्यविद्या त्रिगुणात्मिका परा।**
**कार्यानुमेया सुधियैव माया यया जगत्सर्वमिदं प्रसूयते॥**[2] इति।

विशुद्धब्रह्मस्वरूपस्य जीवात्मनः कर्तृत्वभोक्तृत्वादिसम्बन्धः एव संसारबन्धः। तद्धेतुः अविद्यैव। अविद्यानिवृत्त्या जीवस्य आत्यन्तिकबन्धनिवृत्तिस्ततो मुक्तिः। सा च अविद्या प्रत्यगभिन्नब्रह्म-साक्षात्कारात्मकज्ञानेन निवर्तते। अविद्यास्वरूपविवेचनेन ततो विमुक्तिः स्यात्। तस्याः अविद्यायाः नानापर्यायपदानि गुणप्रयुक्तानि उल्लिख्य तत्स्वभावः प्रत्येतव्यः।

**विषयारम्भः**

पञ्चपादिकायां पद्मपादाचार्यैः "येयं श्रुतिस्मृतीतिहासपुराणेषु नामरूपम्, अव्याकृतम्, अविद्या, माया, प्रकृतिः, अग्रहणम्, अव्यक्तम्, तमः, कारणम्, लयः, शक्तिः, महासुप्तिः, निद्रा, अक्षरम्, आकाशमिति च तत्र तत्र बहुधा गीयते"[3] इत्यादिना अनेकानि अविद्यापर्यायपदानि प्रदर्शितानि। तानि पदानि च पञ्चपादिकाविवरणव्याख्यायां तत्त्वदीपने संक्षेपेण व्याख्यातानि। तत्रैव तानि पर्यायपदानि अविद्यागुणप्रयुक्तानि एव भवन्ति इत्यपि प्रदर्शितम्। अतश्च तत्त्वदीपनानुसारं संक्षेपेण अविद्यापर्यायपदानि विमृश्यन्ते।

**१. नामरूपम् –** "नामादेः सत्त्वेन असत्त्वेन चानिरूपणात् अविद्यात्मकत्वम्"[4] इति नामरूपशब्देन अविद्योच्यते। तच्च अविद्यागुणप्रयुक्तमेव भवति। ब्रह्मसूत्रशाङ्करभाष्येऽपि अविद्यया कल्पितनामरूपयोः अनिर्वचनीयत्वं प्रतिज्ञातम्। यथा "सर्वज्ञस्येश्वर-स्यात्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य मायाशक्तिः प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते; ताभ्यामन्यः सर्वज्ञ ईश्वरः"[5] इति। इत्थम् अविद्याकार्ययोः नामरूपयोः अनिर्वचनीयोक्तिः अविद्याया अपि अनिर्वचनीयत्वं गमयति। सत्त्वं नाम त्रिकालाबाध्यत्वम्। असत्त्वं तु त्रिकालेऽपि सत्त्वेन प्रतीत्यनर्हत्वम्। अविद्यायाः तत्कार्ययोः नामरूपयोः सत्त्वेन असत्त्वेन सदसद्भ्यां च निरूपणासम्भवात् अनिर्वाच्यत्वम् अङ्गीकृतम्। अनिर्वाच्यत्वादेव नामरूपकार्ययोः तद्धेतोरविद्यायाश्च मिथ्यात्वं प्रतिपाद्यते।

**२. अव्याकृतम्-** न व्याकृतम् अव्याकृतम्। नामरूपात्मना अनभिव्यक्ता अपि अविद्या प्रलयादौ सूक्ष्मबीजभावेन अवस्थिता इति अव्याकृतम् उच्यते। प्रोक्तं यथा- "प्रलयादौ अविद्या विद्यते न च नामादि इति भेदमाशङ्ङ्क्य आह अव्याकृतमिति। प्रलयादौ अनभिव्यक्ततया स्थितमित्यर्थः"[6] इति।

**३. अविद्या –** चराचरप्रपञ्चस्य प्रलयादौ अविद्या कारणात्मना विद्यते एव। अविद्यायाः परिणामितया प्रपञ्चोपादानत्वाङ्गीकारात्। प्रलयादौ सूक्ष्मकारणभावेन विद्यमानत्वात् मुक्तावपि अविद्यायाः अनिभिव्यक्तस्थितिः स्यादिति आक्षेपपरिहाराय अविद्या इति प्रयुज्यते। अविद्या नाम विद्याविरोधिपदार्थः कथ्यते। अतश्च सा विद्यानिवर्त्या ज्ञानबाध्या इत्यर्थः।

**४. माया –** मायाशब्दिता अविद्या अविद्यमानमपि आपाद्य मोहयति। सद्वस्तुनि असद्वस्त्वारोपहेतुः माया। तदुक्तम् "अद्वितीयवस्तुनि नामरूपप्रदर्शकत्वमाह माया"[7] इति।

**५. प्रकृतिः –** प्रपञ्चोपादनकारणं परमाण्वादयः इत्याक्षेपपरि-हाराय प्रकृतिः इत्युच्यते। अविद्यैव जगतः परिणाम्युपादानम्। अविद्याप्रकृतिम् इदं चराचरात्मकं जगदिति वेदान्तसिद्धान्तः। भूतभौतिकप्रपञ्चाकारेण अविद्यैव परिणमते। उपादानकारणसम-सत्ताककार्यापत्तिः परिणामः इत्युक्तम्। अचेतनत्वसावयवत्वानित्य-त्वादयो धर्माः प्रपञ्चकार्ये अनुभूयमानाः स्वोपादानकारणादेव सङ्क्रान्ताः इति वक्तव्यम्। कार्यप्रपञ्चे नामरूपयोरपि अविद्यायाः एव सम्भवः। अविद्यैव परिणामितया प्रपञ्चोपादानं न परमाण्वादय इति वेदान्तशास्त्रसम्मतम्।

**६. अग्रहणम् –** अविद्या विशुद्धानन्दस्वरूपं परमेश्वरमाश्रित्य परमेश्वरस्वरूपमेव आच्छादयतीति अग्रहणपदेन सूच्यते। तदुक्तं – "पूर्णानन्दाच्छादकत्वेन व्यवस्थिता इत्याह अग्रहणमिति।"[8] इति। अविद्या शुद्धं ब्रह्म आश्रित्य शुद्धस्यैव आच्छादकमपि भवति इत्यर्थः।

**७. अव्यक्तम् –** न व्यक्तम् अव्यक्तमिति अविद्यायाः करणागोचरत्वमेव अभिधीयते। **तदुक्तम् –** "इन्द्रियाद्यगोचरत्वमाह अव्यक्तमिति"[9] इति। कार्यकरणसङ्घातहेतोः अविद्यायाः साक्षिवेद्यत्वमेव न इन्द्रियवेद्यत्वमिति सूचयितुम् अव्यक्तमित्यपि कथितम्।

**८. तमः–** भामतीकारादिमतानुसारम् अविद्यायाः आश्रयः विषयश्च भिद्यते। सा च अविद्या जीवाश्रिता उपहितब्रह्मविषयिणी इति भामतीव्याख्यातुः वाचस्पतेर्मतम्। किन्तु विवरणकारमते तु अविद्यायाः आश्रयविषयभेदो न भवतीति सूच्यते। विवरणमता-नुसारम् अविद्या शुद्धब्रह्मविषयिणी शुद्धब्रह्माश्रिता च भवति इति वक्तुं तमः इति पदं प्रयुक्तम्। तदुक्तं तत्त्वदीपने "एकाश्रयविषयत्वमाह तमः इति"[10]।

**९. कारणम् –** अनिर्वचनीयायाः अविद्यायाः स्वातिरिक्तानि निमित्तानि नापेक्षितानि इति दर्शयितुमेव कारणमिति शब्दः अविद्यापर्यायतया प्रयुज्यते। परमेश्वराश्रितायाः अविद्यायाः जीवकर्माद्यनिर्वचनीयसहकारिसाधनानि स्वतः एव सम्भवन्ति इति भावः।

**१०.लयः –** सुषुप्ते महाप्रलयादौ च चराचरात्मकस्य प्रपञ्चस्य अविद्यापरिणाममात्रस्य लयाश्रयत्वेन समवस्थिता अविद्या लयशब्देन उच्यते। तदुक्तं "सुप्ते प्रलयादौ कार्यप्रपञ्चलयाधारत्वेन अवस्थिता इत्याह लयः इति।"[11] इति।

**११.शक्तिः –** परमेश्वराश्रिता एव अविद्या भूतभौतिकाकार-प्रपञ्चस्य उपादानमिति वक्तुं शक्यते। न हि जडायाः तस्याः स्वातन्त्र्येण सृष्टिकार्ये प्रवृत्तिः उपपद्यते।

**१२.महासुप्तिः –** जीवस्य सुषुप्त्यवस्थायां कारणशरीररूपा अविद्या विक्षेपहेतुत्वेन स्वीक्रियते। तदवस्थायां सोऽयं विक्षेपः अनभिव्यक्तरूपा भवति कार्यकरणसङ्घातविलयात्। सुषुप्त्यादौ इव प्रलयादावपि विक्षेपहेतुत्वेन अविद्या अवस्थिता इति वक्तुं सा महासुप्तिरिति कथ्यते। तदुक्तं – "महाप्रलये अपि सुप्तादौ इव विक्षेपहेतुत्वेन स्थिता इत्याह महासुप्तिः"[12] इति।

**१३.** निद्रा – जाग्रदवस्थायां माया यथा जीवविशेषकल्पकत्वेन अवस्थिता तथा स्वप्नावस्थायां निद्रारूपदोषः जीवभेदविक्षेपहेतुतया वर्तते। जीवभेदकल्पनाहेतुरूपसाम्यम् उपेत्य निद्रापदेन अविद्या उच्यते। प्रोक्तं "निद्रायाः जीवभेदलक्षणविक्षेपहेतुत्वेन तत्साम्यम् आह निद्रा"[13] इति।

**अक्षरम् –** न क्षरम् अक्षरम्। ब्रह्मापरोक्षज्ञानोत्पत्तिपर्यन्तं नैव अविद्या क्षीयते। "ज्ञानातिरिक्तानिवर्त्यत्वमाह"[14] इत्यादिना ज्ञानमात्रम् अविद्यानिवर्तकमिति सूचितम्।

**१४.**विद्याविरोधिनी एव अविद्या भवति। सा च अपरोक्षविद्यया एव निवर्तते इति वक्तव्यम्। अहमज्ञः इति बन्धहेतोरविद्यायाः

अपरोक्षतया एव सिद्धेः प्रत्यगभिन्नब्रह्मापरोक्षधीः एव आत्यन्तिका-विद्यानिवृत्तौ हेतुः। ज्ञानातिरिक्तेन उपायान्तरेण अविद्या नैव निवर्तते।

**१५.आकाशम् –** मायोपाधिकात्परमेश्वरात् आकाशादयः सूक्ष्मभूत-पदार्थाः उत्पन्नाः इति श्रुतिप्रसिद्धमेव। तत्र आकाशोऽपि उत्पद्यते एव इति वेदान्तसिद्धान्तः। उत्पत्तिमत्त्वादेव आकाशः अनित्यपदार्थः, न नित्यः। तदुक्तं "आकाशस्य नित्यत्वं व्यावर्तयति आकाशमिति"[15]। यथा च अन्ये तेजोबन्नादयः भूतविशेषाः परमेश्वरादेव समुत्पद्यन्ते, एवमेव परमते नित्यत्वेनाभिमतः आकाशोऽपि उत्पद्यत एव "आत्मन आकाशः सम्भूतः"[16] इति श्रुतेः। आविद्यकस्य सर्वस्यापि पदार्थस्य परमार्थत्वनिराकरणात् अनित्यत्वमेव इति भावार्थः।

भाष्यकारैरपि शङ्कराचार्यैः स्वीयप्रस्थानत्रयभाष्ये तत्र तत्र अविद्यापर्यायपदानि अनेकानि बीजशक्तिः, मायाशक्तिः, अव्याकृतं, तमः, मूलप्रकृतिः, वैष्णवी, दैवी इति प्रयुक्तानि। भगवद्गीताभाष्ये आचार्यैः स्वभावपदस्य निर्वचनं तु अविद्यैव इति व्याख्यातम् तद्यथा "स्वभावस्तु स्वो भावः स्वभावः अविद्यालक्षणा प्रकृतिः माया प्रवर्तते 'दैवी हि' इत्यादिना वक्ष्यमाणा"[17] इति। एवमेव वेदान्तसंप्रदायविदः सर्वज्ञात्ममुनयः संक्षेपशारीरके अविद्यायाः अन्यानि कानिचन पर्यायपदानि प्राहुः। तद्यथा -

**अज्ञानमिति अजडबोधतिरस्क्रियात्मा**
**जाड्यं च मौढ्यमिति च प्रकृतिः प्रसिद्धा।**
**सा च अतिदुःस्थितवपुः दृशमद्वितीयाम्**
**आलिङ्गति स्म धृतपिण्डः इव अग्निमिद्धम्॥**[18] इति

चिद्वस्तुनः चिति भवेत् तिमिरं तमिस्रं तामिस्रमन्धतमसं जडिमा तमिस्रा।

माया जगत्प्रकृतिः अच्युतशक्तिः आन्ध्यं निद्रा सुषुप्तिः अनृतं प्रलयः गुणैक्यम्॥[19] इति च।

एतेषु जाड्यं, मौढ्यं, तिमिरं, तमिस्रं, तामिस्रम्, अन्धतमसं, तमिस्रा, आन्ध्यम्, अनृतं, गुणैक्यम् इत्यदीनि कानिचन अविद्यापर्यायपदानि पञ्चपादिकानभिहितानि भवन्ति। तत्र अन्वयार्थप्रकाशिका-व्याख्यायाम् अल्पाक्षरेण एतेषां चितानामेव पदानां व्याख्यानं विहितम्।

यथा -"सा प्रकृतिरेव ज्ञानपर्युदासेन अज्ञानमिति ज्ञानविरोधित्वेन जाड्यमिति च अस्वच्छतया मौढ्यमिति च प्रसिद्धा..... इति। तिमिरादिशब्दाः हि निष्प्रतियोगिकमर्थमावेदयन्ति। अतः अज्ञान-मिति शब्दः ज्ञानपर्युदासेन उच्यमानोऽपि अधर्मशब्दवत् न अभावविषय इति भावः"[20] इति । एवञ्च एतानि सर्वाणि पर्यायपदानि अविद्यागुणप्रवृत्तिनिमित्तानि तत्स्वभावनिरूपणपराणि भवन्ति।

**उपसंहारः**

अनिर्वचनीयाविद्यामाश्रित्यैव परमेश्वरस्यापि भूतभौतिकप्रपञ्चसृष्टि-वषयिणी सङ्कल्पो भवति "तदैक्षत बहुस्यां प्रजायेय"[21] इति श्रुतेः। निरुपाधिकस्य तस्य विशुद्धचिन्मात्रस्वभावस्य जगज्जन्मादिकारण-त्वमपि नोच्यते। तदुपाधिभूताविद्यायाः मायाव्यक्ताव्याकृतादिशब्द-वाच्यायाः स्वरूपविवेचनं तदीयपर्यायपदैरेव सम्पादनीयमिति, तानि तत्त्वदीपनव्याख्यानुसारं व्याख्यातानि इति शम्।

**परिशीलितग्रन्थसूची**

१. पञ्चपादिका– सम्पादकः एस्.सुब्रह्मण्यशास्त्री, श्रीदक्षिणामूर्तिमठ-प्रकाशनम् वाराणसी, २००९
२. ब्रह्मसूत्रशाङ्करभाष्यम्– सम्पादकः आचार्यजगदीशशास्त्री, मोतीलालबनारसीदास वाराणसी, २००५
३. श्रीमद्भगवद्गीताभाष्यम्(प्रथमद्वितीयखण्डौ) - सम्पादकः आचार्यः श्रीमणिद्राविडः, श्रीदक्षिणामूर्तिमठप्रकाशनम् वाराणसी,२०१५
४. संक्षेपशारीरकम् – सम्पादकः स्वामी दिव्यानन्दगिरिः, राष्ट्रीय संस्कृत संस्थान नई दिल्ली,१९९९
५. अद्वैतवेदान्ते अज्ञानविमर्शः – गन्थकर्ता डा. के. विश्वनाथः, राष्ट्रियसंस्कृतविश्वविद्यालयः तिरुपतिः, २०११.
६. https://advaitasharada.sringeri.net/

**सन्दर्भ ग्रन्थः**

[1]ब्रह्मसूत्रम्- १.४.१.३
[2]विवेकचूडामणिः- श्लो.सं.११०
[3]पञ्चपादिका -पृ.सं.१७३-१७४
[4]तत्त्वदीपनम्-पृ.सं.१७३
[5]ब्रह्मसूत्रभाष्यम् - २.१.६.१४
[6]तत्त्वदीपनम्-पृ.सं.१७३
[7]तत्त्वदीपनम्-पृ.सं.१७३
[8]तत्त्वदीपनम्-पृ.सं.१७३
[9]तत्त्वदीपनम्-पृ.सं.१७४
[10] तत्त्वदीपनम्-पृ.सं.१७४
[11] तत्त्वदीपनम्-पृ.सं.१७४
[12] तत्त्वदीपनम्-पृ.सं.१७४
[13] तत्त्वदीपनम्-पृ.सं.१७४
[14] तत्त्वदीपनम्-पृ.सं.१७४
[15] तत्त्वदीपनम्-पृ.सं.१७४
[16] तै.उ.२.१.१
[17] भगवद्गीताभाष्यम्- श्लोक.सं. ५.१४
[18] संक्षेपशारीरकम् – १.३१६
[19] संक्षेपशारीरकम् – १.३१८
[20] अन्वर्थप्रकाशिका – पृ.सं. २४६-२४८
[21] छा. उ. ६.२.३